## तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्विङोः। (१८६/३७३०)

[1]तासेरनुदात्तेतो ङितोऽकारान्तोपदेशाच्च शब्दात् परं लसार्वधातुकमनुदात्तं [2]च भवति ह्नुङ इङ इत्येताभ्यां परं वर्जयित्वा। तासेस्तावत्-कर्ता, कर्तारौ, कर्तारः। प्रत्ययस्वरापवादोऽयम्। अनुदात्तेतः – आस – आस्ते। वस – वस्ते। ङित् – षूङ – सूते। शीङ – शेते। अदुपदेशात् – तुदतः। नुदतः। पचतः। पठतः। अनुबन्धस्या[3]नैकान्तिकत्वादकारान्तोपदेश एव शप्। पचमानः। यजमानः। यद्यत्र मुक् अकारमात्रस्य स्यात् तदा लसार्वधातुकमदुपदेशादनन्तरम् इति [4]सिद्धो निघातः। [5]अथाकारान्तस्याङ्गस्य, तथापि लसार्वधातुकानुदात्तत्वे कर्तव्ये बहिरङ्गत्वात् असिद्धः इति सिद्धम्। चित्स्वरोऽप्यनेन लसार्वधातुकानुदात्तत्वेन परत्वाद् बाध्यते।

तास्यादिभ्यः इति किम्? चिनुतः। चिन्वन्ति। ङिदयं श्नुः पूर्वस्य कार्यं प्रति न [6]तु परस्य। उपदेश[7]ग्रहणं किम्? इह च यथा स्यात्, पचावः, पचामः इति। इह च मा भूत्, हतो, हथः इति। लग्रहणं किम्? कतीह[8]पचमानाः। सार्वधातुकम् इति किम्? शिश्ये, शिश्याते, शिश्यिरे। अह्न्विङोः इति किम्? ह्नुते। यदधीते॥

## आदिः सिचोऽन्यतरस्याम्। (१८७/३७३१)

उदात्तः [9]इति वर्तते। सिजन्तस्यान्यतरस्यामादिरुदात्तो भवति। मा हि कार्ष्टाम्, मा हि कार्ष्टाम्। एकोऽत्राद्युदात्तः, अपरोऽन्तोदात्तः। मा हि लाविष्टाम्, मा हि लाविष्टाम्। एकोऽत्र आद्युदात्तः, अपरो मध्योदात्तः। सिचश्चित्करणादागमानुदात्तत्वं हि बाध्यते।

[७०३] सिच आद्युदात्तत्वेऽनिटः पितः पक्षे उदात्तत्वं [10]वक्तव्यम्। (म.भा. ३.११३)

मा हि कार्षम्, मा हि कार्षम्। अनिटः इति किम्? मा हि लाविषम्। मध्योदात्त एवा[11]द्युदात्ताभावपक्षे भवति॥

## स्वपादिर्हिंसामच्यनिटि। (१८८/३६७२)

लसार्वधातुकग्रहणं यदनुवर्तते तदचि अनिटि इति सम्बन्धाद् इह सप्तम्यन्तम् उपजायते। स्वपादिरावृत्करणात्। स्वपादीनां हिंसेश्चाजादावनिटि लसार्वधातुके परतोऽन्यतरस्यामादिरुदात्तो भवति। स्वपन्ति, स्वपन्ति। श्वसन्ति, [12]श्वसन्ति। हिंसेः खल्वपि – हिंसन्ति, हिंसन्ति[13]। प्रत्ययस्वरेण पक्षे मध्योदात्तः। अचि इति किम्? स्वप्यात्। हिंस्यात्। अनिटि इति किम्? स्वपितः। श्वसितः। [14]ङित्यजादावयं विधिरिष्यते। इह न भवति, स्वपानि, हिनसानि॥

---

1. तासेः नास्ति ग. 2. च नास्ति क. 3. अनेकान्तत्वात् क. 4. सिद्धम् क. 5. अथ–सिद्धम् नास्ति क. 6. तु नास्ति क. 7. इति इत्यधिकम् ह. 8. यजमानाः ह. 9. इत्येव ह. 10. उपसङ्ख्यानम् क.ह. 11. आद्युदात्तपक्षे ह. 12. अवन्ति, अतन्ति इत्यधिकम् क.ह. 13. हिंसन्तु ड. 14. ङिति – हिनसानि नास्ति क.फ.ह.